# ॥ विषयसूची ॥

## प्रथमभागे


| विषय: | पृष्ठम् |
| --- | --- |
| मङ्गलाचरणम् | १ |
| अग्न्याधेयम् | ,, |
| गार्हपत्याधानम् | ५ |
| दक्षिणाग्न्याधानम् | ,, |
| आहवनीयाधानम् | ६ |
| सभ्यावसथ्ययोरग्न्योराधानम् | ,, |
| पवमानेष्टय: | ७ |
| आधानपवमानेष्टीनामङ्गाङ्गिभाव: | ,, |
| आधानौपयिकानि द्रव्याणि पात्राणि च | ८ |
| अग्निहोत्रम् | ९ |
| अग्निहोत्रे उदितानुदितहोमभेद: | १० |
| तदनुष्ठानप्रकार: | ,, |
| अग्निहोत्रनाम्नि मतभेद: | १२ |
| अग्न्युपस्थानं लेपभक्षश्च | ,, |
| अग्निहोत्रे कर्ता | १३ |
| अग्निहोत्रप्रशंसा | ,, |
| अग्निसमारोपणादि | १४ |
| विषयविवेचनम् | १५ |
| दर्शपूर्णमासौ | १६ |
| यागानुष्ठानकाल: | १८ |
| पौर्णमासीदिनकृत्यम् | १९ |
| कृष्णप्रतिपद्दिनकृत्यम् | २० |
| हविर्निर्वाप: | ,, |
| अवहननपेषणे | २१ |
| हवि:श्रपणम् | ,, |
| वेदिनिर्माणम्, आज्यग्रहणादिकं च | २२ |
| आज्यग्रहणम् | २२ |
| वेदिस्तरणं पात्रसादनं च | २३ |
| सामिधेनीकर्म | २४ |
| प्रयाजा: | २५ |
| प्रधानयागानुष्ठानम् | २६ |
| स्विष्टकृद्याग: | २७ |
| इडाभक्षणादि | ,, |
| ऋत्विग्दक्षिणा, अनूयाजाश्च | २८ |
| पत्नीसंयाजादिकम् | २९ |
| याजमानम् | ३० |
| दर्शयागे विशेषा: | ३१ |
| वत्सापाकरणम् | ,, |
| शुक्लप्रतिपद्दिनकृत्यम् | ३३ |
| दार्शपौर्णमासिकानि द्रव्याणि पात्राणि च | ३४ |
| पिण्डपितृयज्ञ: | ३६ |
| पिण्डपितृयज्ञौपयिकानि द्रव्याणि पात्राणि च | ३७ |
| निरूढपशुबन्ध: | ३८ |
| अग्निप्रणयनम् | ४० |
| पात्रसादनादि | ,, |
| पशुसंज्ञपनवपाहोमादि | ४२ |
| हृदयाद्यङ्गयाग: | ४३ |
| अनूयाजाद्यनुष्ठानम् | ४४ |
| पशुयागोपयुक्तानि द्रव्याणि पात्राणि च | ,, |
| चातुर्मास्यानि | ४५ |
| वैश्वदेवपर्व | ,, |

## आधानौपयिकानि द्रव्याणि पात्राणि च

अरणिद्वयम् (अधरारणिः, उत्तरारणिश्च) अग्निमथनार्थम् ॥
मन्थिप्रमन्थिनौ । तदर्थमेव ।

अष्टौ पार्थिवास्सम्भाराः—(मृत्सम्बद्धाः)[1]

| | | | |
|---|---|---|---|
| (१) | सिकताः । | (५) | शर्कराः (क्षुद्रपाषाणाः) । |
| (२) | ऊषरमृत् । | (६) | वल्मीकमृत् । |
| (३) | मूषिकोत्खाता मृत् । | (७) | शूकर(वराह) मुखोत्खाता मृत् । |
| (४) | अशोष्यजलाशयमृत् । | (८) | हिरण्यम् । |

अग्निनिधानात् पूर्वमेते कुण्डेषु क्षेपणीयाः ॥

सप्त वृक्षसम्बन्धिनः सम्भाराः—

| | | | |
|---|---|---|---|
| (१) | अश्वत्थकाष्ठशकलानि । | (५) | पलाशवृक्षकाष्ठशकलानि । |
| (२) | औदुम्बरकाष्ठशकलानि । | (६) | विकङ्कतवृक्षशकलानि । |
| (३) | शमीवृक्षकाष्ठशकलानि । | (७) | पद्मपत्राणि च । |
| (४) | अशनिहतवृक्षकाष्ठशकलानि[क] । | | |

शीतजलमुष्णजलं च (पत्नीयजमानयोः स्नानार्थम्)
दुकूलवस्त्राणि (तयोरेव परिधानार्थम्)

ग्रामादिचिह्नभूतस्य अश्वत्थवृक्षस्य फलवत्यः तिस्रः समिधः (ब्रह्मौदनिकाग्नावाधानार्थम्) ॥

अश्वत्थवृक्षीयाः समिधो नव
शमीमय्यः समिधो द्वादश
वैकङ्कत्यः समिधस्तिस्रः
(गार्हपत्यादिषु त्रिष्वप्यग्निषु तदा तदा निक्षेपणार्थमेव विध्यनुरोधेन)

पैत्तलं ताम्रमयं वा पात्रम् (ब्रह्मौदनपाकार्थम्)
शरावाः (तत्तदग्निप्रणयनार्थम्)
दर्वी पैत्तली ताम्रमयी वा (ब्रह्मौदनोद्धरणार्थम्)
घृतं गव्यं माहिषं वा (होमाभिघारणाद्यर्थम्)

---

क. अरण्ये स्थितस्य वृक्षस्य यस्योपरि अशनिः पतति, तेन च यो हतः सोऽशनिहतो वृक्षः ॥

---

१. *See*. आप. श्रौ. ५. १. २. बौधा. २. १२.

वर्षतौं केवलेन नवश्यामाकनिष्पादितचरुणा यजेत । सोम एव देवता । एवं वसन्ते यवाग्रयणं कर्तव्यम् । तत्र पुराणानां यवानामुपयोगो नास्ति । ऐन्द्राग्नवैश्वदेवद्यावापृथिवीयरूपाणि त्रीण्येव नवयवनिष्पादितानि हवींषि । इयन्तो विशेषाः । अन्यत्सर्वं प्रकृतिवत् । साक्षात्प्रतिनिधिरूपेण वा आग्रयणं कृत्वैव नवान्नमश्नीयादाहिताग्निः ॥

॥ इत्याग्रयणेष्टिः ॥

इति महामहोपाध्याय-शास्त्ररत्नाकर-पण्डितसार्वभौम-श्रीचिन्नस्वामिशास्त्रि-
विरचिते यज्ञतत्त्वप्रकाशे हविर्यज्ञनिरूपणाख्यः
प्रथमो भागः ॥

गच्छेयुः । मार्जालीयसमीपेऽष्टौ दासकुमार्य उदकुम्भान् गृहीत्वा परिनृत्येयुः । एवं यजमानपत्न्यो वीणाविशेषैरुद्गातुरुपगानं कुर्युः । ततः तन्त्रीशतयुक्तां महावीणां वादयेयुः शङ्खांश्च । तत्र मुखवीणाः काण्डवीणाश्च वादयेरन् । एते अन्ये च केचन विशेषा महाव्रते सन्ति । अन्यदितराहर्वत् ॥

इदमेव संवत्सरसत्रमितरेषामित उत्तरेषां सत्राणां प्रकृतिभूतम् । विशेषाः परं ये केचित् तत्र तत्र विहितास्ते च श्रौतसूत्रादितो विशेषजिज्ञासुभिरवगन्तव्याः ॥

इति महामहोपाध्याय-शास्त्ररत्नाकर-पण्डितसार्वभौम-श्रीचिन्नस्वामिशास्त्रि-विरचिते यज्ञतत्त्वप्रकाशे अग्निचयनादिनिरूपणाख्यः तृतीयो भागः

एवं अग्न्याधेयमारभ्य गवामयनाख्यसंवत्सरसत्रान्ता याज्ञिकी प्रक्रिया आपस्तम्बश्रौतसूत्रं तैत्तिरीयसंहितां च प्राधान्येनावलम्ब्य निरूपिता । परमियं पदार्थज्ञानायैवोपयुज्येत । अनुष्ठातृभिस्तु श्रौतसूत्र-ग्रन्थाः पद्धतयश्च अनुष्ठानार्थमाश्रयणीयाः ॥

ऋषीषुलोकवसुधा (१३५७) मिते वङ्गीयवत्सरे ।
सप्ताधिकद्विसाहस्रे (२००७) वैक्रमे विकृताह्वये ॥
वर्षे कार्तिकराकायां प्रगे भार्गववासरे ।
नगर्यां कलिकातायां ग्रन्थोऽयं पूर्णतामगात् ॥

रघुनाथान्नपूर्णाभ्यां जातेन विदुषां कुले ।
श्रीवेङ्कटोपपदकसुब्रह्मण्याग्रजन्मना ॥
श्रौतसूत्रब्राह्मणादिग्रन्थानालोड्य सर्वशः ।
कृतोऽयं ग्रन्थसन्दर्भो भवतात् सुधियां मुदे ॥
यस्याः प्रसादवशतः कृतिरेषा व्यरच्यत ।
तस्या एनां जगन्मातुः पदद्वन्द्वेऽर्पयाम्यहम् ॥

इति वेदवेदाङ्गपारदृश्ववैदिकसार्वभौमवाधूलवंशाम्बुधिसद्रत्न—श्रीरघुनाथ-सूरितनुजन्मना श्रीमदन्नपूर्णागर्भसम्भूतेन, महामहोपाध्याय, शास्त्ररत्नाकर, पण्डितसार्वभौम, वेदविशारदादिविविधोपाधिविभूषितेन श्रीचिन्नस्वामि-शास्त्र्यपरनाम्ना वेङ्कटसुब्रह्मण्येन विरचितो यज्ञतत्त्वप्रकाशः समाप्तः ॥

